# ॥ श्रीवासरसरस्वतीस्तोत्रम् ॥

.. shrI vAsara sarasvatI stotram ..

sanskritdocuments.org

September 11, 2017

# .. shrI vAsara sarasvatI stotram ..

# ॥ श्रीवासरसरस्वतीस्तोत्रम् ॥

## Sanskrit Document Information

Text title : vAsarasarasvatIstotram

File name : vAsarasarasvatIstotram.itx

Category : devii, sarasvatI

Location : doc_devii

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran

Latest update : July 1, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

शरच्चन्द्रवक्त्रां लसत्पद्महस्तां सरोजाभनेत्रां स्फुरद्रत्नमौलिम् ।
घनाकारवेणीं निराकारवृत्तिं भजे शारदां वासरापीठवासाम् ॥ १॥

धराभारपोषां सुरानीकवन्द्यां मृणालीलसद्बाहुकेयूरयुक्ताम् ।
त्रिलोकैकसाक्षीमुदारस्तनाढ्यां भजे शारदां वासरापीठवासाम् ॥ २॥

दुरासारसंसारतीर्थाब्धिपोतां क्वणत्स्वर्णमाणिक्यहाराभिरामाम् ।
शरच्चन्द्रिकाधौतवासोलसन्तीं भजे शारदां वासरापीठवासाम् ॥ ३॥

विरिञ्चीन्द्रविष्ण्वादियोगीन्द्र पूज्यां प्रसन्नां विपन्नार्तिनाशां शरण्याम् ।
त्रिलोकाधिनाथाधिनाथां त्रिशून्यां भजे शारदां वासरापीठवासाम् ॥ ४॥

अनन्तामगम्यामनाद्यामभाव्यामभेद्यामदाह्यामलेप्यामरूपाम् ।
अशोष्यामसङ्गामदेहामवाच्यां भजे शारदां वासरापीठवासाम् ॥ ५॥

मनोवागतीतामनाम्नीमखण्डामभिन्नात्मिकामद्वयां स्वप्रकाशाम् ।
चिदानन्दकन्दां परञ्ज्योतिरूपां भजे शारदां वासरापीठवासाम् ॥ ६॥

सदानन्दरूपां शुभायोगरूपामशेषात्मिकां निर्गुणां निर्विकाराम् ।
महावाक्यवेद्यां विचारप्रसङ्गां भजे शारदां वासरापीठवासाम् ॥ ७॥

इमं स्तवं पठेद्यस्तु त्रिकालं भक्तिसंयुतः ।
शारदासाम्यमाप्नोति गृहे स्थित्वाञ्च सम्भवम् ॥ ८॥ ??

॥ इति श्री ब्रह्माण्डपुराणान्तर्गत वाल्मीकिकृत
श्रीवासरसरस्वतीस्तोत्रं सम्पूर्णम् ॥

Encoded by Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by Malleswara Rao Yellapragada, PSA Easwaran

.. shrI vAsara sarasvatI stotram ..

Searchable pdf was typeset using generateactualtext feature of XƎLaTeX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*